# राजाभर्तृहरेः अभिवृत्त्याधारितव्यक्तित्वम्

**डॉ. धर्मेन्द्र शर्मा**

**अतिथिप्राध्यापकः,**

**शिक्षाशास्त्रविभागः,**

**महर्षि-पाणिनि-संस्कृत-एवं**

**- वैदिकविश्वविद्यालयः, उज्जैनः**

- **उद्देश्यम्-**

1.परिवर्तमाने संसारे राजाभर्तृहरेः प्रासङ्गिताप्रतिपादनम्।

2.भर्तृहरिणा प्रोक्तस्य व्यक्तित्वसिद्धान्तस्य प्रतिपादनम्।

- **प्रस्तावना –**

जगत्यस्मिन् सर्वेऽपि प्राणिनः परस्परसमायोजनं विधाय वसन्ति व्यवहरन्ति च। तत्र जनाः समयस्य कस्मिंश्चिदपि भागे यदा किमपि न कुर्वन्ति तथापि कश्चन व्यवहारः तेषां दृश्यते हि। अतो विशिष्टप्रयोजनेन क्रियमाणेन व्यवहारस्य का कथा? व्यवहारवशाद् हि समाजे मानवः प्रियः वा अप्रियः प्रतिभाति। एतस्मात् कारणात् जनाः तस्मै प्रशंसन्ति निन्दन्ति च। मानवस्य व्यवहारस्य मूले एकः पक्षः राजते तस्य अभिवृत्तिः। इयम् अभिवृत्तिः मनोवृत्तिः वा आङ्ग्लभाषायां Attitude इति कथ्यते। वातावरणे अनुभवेनार्जिता मानवस्य सा मनोवृत्तिः, या लोके तस्य व्यवहारे अवलोक्यते। अभिवृत्याः अभिप्रेरणया मानवः कञ्चित् जनं प्रति वस्तु प्रति घटनां प्रति वा विशिष्टानुक्रियायै प्रेरितो भवति। अभिवृत्तेः सन्दर्भे **थर्सटन-चेबमहोदयाभ्यां** निगदितम्- **कस्मैचित् विशिष्टप्रकरणाय व्यक्तेः प्रवृत्तीनां भावनानां पूर्वाग्रहाणां विचाराणां भयानां तर्जनानां मान्यतानां च योगः वर्तते।**[1]

राजाविक्रमादित्यस्य अग्रजः शतकत्रयस्य वाक्यपदीयस्य च कर्ता राज्ञा

---

[1] उच्चतर शिक्षा मनोविज्ञान, पृ.स.- 627

भर्तृहरिणा स्वग्रन्थेषु जगत्कल्याणदायकानि प्रवचनानि उदीरितानि। तत्र भर्तृहरिः व्यक्तित्वसन्दर्भेऽपि बहु किमपि अनुभवजन्यज्ञानेन प्रतिपादितम् वर्तते।

विविधानां अभिवृत्तीनां समूहः मानवव्यक्तित्वस्य निर्माणे योगं प्रयच्छति। **वि** उपसर्गपूर्वकं **अञ्जु** धातोः **क्तिन्** प्रत्यये कृते व्यक्तिः इति शब्दः निष्पद्यते अपि च भावार्थे **त्व** प्रत्यययोजनेन **व्यक्तित्वम् इ**ति शब्दः सिद्ध्यते। व्यक्तित्वं मानवस्य सः व्यावहारिकपक्षः येन तस्य उन्नतिः वा अवनतिः समाजे जायते ज्ञायते च। उच्यते अपि-

**वस्त्रेण वपुषा वाचा, विद्यया विनयेन च।**
**वकारैः पञ्चभिर्हीनः नरो नायाति गौरवम्।।**[2]

अस्माकं भारतवर्षस्य ऋषिभिः नैकैः आचार्यैः विद्वद्भिः च व्यक्तित्वस्य सुदृढनिर्माणाय कल्याणाय च नैकानि प्रवचनानि उद्घाटितानि। यतो हि अयं हि आधारः सज्जनतायाः दुर्जनतायाश्च। समेषां जनानां व्यक्तित्वं भिन्नं-भिन्नं वर्तते तत्र सर्वेषु जनेषु मानवमूल्यानि समानरूपेण भवितुं नार्हन्ति।

- **भर्तृहरेः व्यक्तित्वविमर्शः –**

षोडशशताब्द्यां मनोविज्ञानं नाम्नः पृथक् सम्प्रत्ययः पाश्चात्यदेशेषु दर्शनात् उद्भूतः। इदं मनोविज्ञानं व्यवहारसम्बद्धं विज्ञानं वर्तते यत्र प्राणिनां मनोदैहिकव्यवहाराणाम् अध्ययनं मनोवैज्ञानिकैः क्रियते। व्यवहारसम्बद्धतावशाद् नैकाः आधुनिकाः मनोवैज्ञानिकाः व्यक्तित्वस्य सन्दर्भे सिद्धान्तान् प्रतिपादितवन्तः। परन्तु इदं मनोविज्ञानं भारतभूमौ मानवजीवनदर्शने प्राक्कालादेव समाहितं वर्तते। यत्र कुत्रापि अस्माभिः भारतीयवाङ्मये धर्मशास्त्रेषु नीतिग्रन्थेषु वा व्यक्तित्वस्य सम्यक् निर्धारणाय प्रामाणिकानि व्यावहारिकानि च तथ्यानि द्रष्टुं शक्यन्ते। यथा श्रीमद्भगवद्गीतायां, चरकसंहितायां सांख्य-योगदर्शनयोः ज्योतिष-साहित्यचेत्यादिषु शास्त्रेषु व्यक्तित्वनिर्धारकतत्वानि लभन्ते। एवमेव राजाभर्तृहरिरपि व्यक्तित्वस्य वैशिष्ट्यं

---

[2] चाणक्यनीतिसारः

प्रकारान्तरेण प्रकाराश्च आह स्वग्रन्थेषु। राज्ञा भर्तृहरिणा परिवर्तमाने संसारे यथा अनुभूतं तस्य प्रकाशनं तेन स्वग्रन्थेषु कृतम्। अयं तेषां व्यक्तित्वस्य महान् पक्षः खलु वर्तते। राजभर्तृहरेः सरसभाषाबद्धाः रचनाः लोकाय कल्याणदायिकाः सन्ति।

व्यक्तित्वं न केवलं मानवस्य जीवनं प्रभावयति प्रत्युत् तस्य परितः वसतां जीवनमपि प्रभावयति। पृथिव्यां अस्यां सर्वेषां जनानां व्यक्तित्वं पृथक् पृथक् भवत्येव क्वचित् प्रवृत्तिवशाद् क्वचित् अभिवृत्तिवशाच्च। भर्तृहरिरपि पुष्णाति इदं तथ्यं। यथोक्तम्-

**वैराग्ये सञ्चरत्येको नीतौ भ्रमति चापरः।**
**शृङ्गारे रमते कश्चिद्भूवि भेदाः परस्परम्।।**[3]

व्यक्तीनाम् अभिवृत्तयः पक्षे भवति वा विपक्षे भवति। एताभिः जनान् प्रति क्रियमाणानां व्यवहाराणां सन्दर्भे सूच्यते। लोके द्रष्टुं शक्यते यत् कस्मैचित् जनाय शीघ्र बोधितुं शक्यते। कस्मैचित् जनाय सुखपूर्वकेण किमपि तथ्यं बोधितु अन्ये जनाः शक्ताः भवन्ति। परन्तु कश्चन जनः एतादृशोऽपि भवति यः सर्वदा कुतर्कं हि करोति न तु विषयबोधितुं प्रयासम्। अत्र पूर्वाग्रहवशाद् अभिवृत्तिः दृश्यते । क्रमशः एतादृशेभ्य जनेभ्यः राजाभर्तृहरिः अज्ञः, विशेषज्ञः अल्पज्ञश्च संज्ञाः प्रदत्ताः परिभाषिताश्च। यथा आहः –

**अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।**
**ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रञ्जयति।।**[4]

जनानां व्यक्तित्वे अभिवृत्तयः स्वीकारात्मिकाः नकारात्मिकाः च भवितुम् अर्हन्ति। एतासाम् अभिवृत्तिनां प्रभावः सर्वदा तेषां कार्येषु अपि भवति। यथा दृश्यते

---
[3] शृङ्गारशतकम्, श्लोकसङ्ख्या- 99
[4] नीतिशतकम्, श्लोकसङ्ख्या- 3

कस्यचित् कार्यस्यारम्भात् प्राक् केचन जनाः नकारात्मकविचारान् विचिन्त्य हि न आरभन्ते। तथा केचन जनाः मध्ये हि कार्यं बाधावशात् त्यजन्ति परन्तु केचन स्वीकारात्मकाभिवृत्तिधारिणः यावान् कर्म समाप्तिं न याति तावान् कर्म नैव त्यजन्ति। एतादृशाः जनाः भर्तृहरिणा नीचाभिवृत्तिधारिणः मध्याभिवृत्तिधारिणः उत्तमाभिवृत्तिधारिणः च प्रोक्ताः। यथा अवलोक्यते-

**प्रारभ्यते न खलु विघ्नभयेन नीचैः,**

**प्रारभ्यविघ्नविहता वरमन्ति मध्याः।**

**विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः,**

**प्रारभ्य चोत्तमजनाः न परित्यजन्ति।।**[5]

व्यक्तित्वे अभिवृत्तिः कञ्चित् समूहं प्रति तथा च विशिष्टरूपेण कञ्चित् जनं प्रति भवितुमर्हति। एतस्मात् कारणात् लोके जनानाम् अभिवृत्तयः अन्यान् जनान् प्रति कार्यसाधने पृथक् पृथक् भवति केषाञ्चित् जनानां व्यक्तित्वं सहयोगाभिवृत्तियुक्तं भवति अपि च कुत्रचित् जनाः असहयोगाभिवृत्तिसम्पन्नाः कुत्रचिच्च कार्यघातकाः दृश्यन्ते। भर्तृहरिः स्वानुभवेन मानवव्यक्तित्वसन्दर्भे उपरोक्ताभिवृत्तयः आधारीकृत्य नीतिशतके अवदत्-

**एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये।**

**सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।**

**तेऽमी मानुषराक्षसाः परहितं स्वार्थाविरोधेन ये।**

**ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे।।**[6]

- **निष्कर्षः –**

एवं प्रकारेण जनेषु सज्जनाभिवृत्त्या दुर्जनाभिवृत्त्या च सर्वत्र भेदः गण्यते।

---

[5] नीतिशतकम्, श्लोकसङ्ख्या- 27

[6] नीतिशतकम्, श्लोकसङ्ख्या- 75

सज्जनाः सर्वदा सदाचरणं विधाय मानवजीवनं सफलीकुर्वन्ति अपि च दुर्जनाः दुराचरणं विधाय जनान् पीडयन्ति। राजाभर्तृहरिः सज्जनानां दुर्जनानां च सन्दर्भे तथ्यात्मकरीत्या लक्षणानि प्रतिपादितवन्तः। भर्तृहरिणा प्रोक्ता व्यक्तित्वसम्बद्धा अभिवृत्तयः साम्प्रतिके युगेऽपि प्रासङ्गिकाः सन्ति। राज्ञः भर्तृहरेः सर्वेऽपि ग्रन्थाः लोकाय हितकारिणः सन्ति। एतेषां ग्रन्थानां सारमिदं यत् जगतः सञ्चालनाय आवश्यकं वर्तते यत् जनाः स्वकर्तव्यानि जानीयुः तेषां च पालनं कुर्युः। अतो व्यावहारिकदृष्टया एतेषु ग्रन्थेषु अनुसन्धेयास्सन्ति।

**सन्दर्भग्रन्थसूची:**


1. उच्चतरशिक्षामनोविज्ञान- प्रो. एस.पी. कुलश्रेष्ठ, डॉ. अलका गुप्ता
2. भर्तृहरिशतकत्रयम्
3. प्रयोगात्मक शिक्षामनोविज्ञान- डॉ. डी. एन. श्रीवास्तवः